તેમાથી એકદેશથી ઓજ આહાર કરે છે. તે પછી ક્રમથી વધતાં જ્યારે પરિપકવ થાય છે, ત્યારે માતાના ઉદરમાંથી બહાર નીકળે છે. કોઈ પુરૂષપણાથી, કોઈ સ્ત્રી પણાથી, અને કોઈ નપુસક પણાથી જન્મ લે છે. તે જીવો. જ્યારે બાલ્ય અવસ્થામાં રહે છે, ત્યારે માતાના દૂધનો આહાર કરે છે અને અનુક્રમથી મોટા થાય છે ત્યારે ભાત, કુલ્માષ, તથા ત્રસ અને સ્થાવર પ્રાણિયોનો આહાર કરે છે અને તેને પોતાના શરીરપણાથી પરિણમાવે છે. તે ઘો વિગેરે ભુજ પરિસર્પ સ્થલચર તિર્યંચ પંચેન્દ્રિય જીવોના અનેક વર્ણ, રસ, ગધ સ્પર્શવાળા અનેક શરીરો હોય છે એ પ્રમાણે કહેલ છે.

હવે ખેચર—આકાશમા ફરનારા પક્ષિયોના સ્વરૂપ અને ભેદ વિગેરેનું નિરૂપણ કરવામાં આવે છે.—'अहावरं पुरक्खायं णाणाविहाणं खचरपंचिंदिय०'

'चम्मपक्खीणं' चर्मपक्षिणाम् 'चमगादड़' इति लोके प्रसिद्धानाम् 'लोमपक्खीणं लोमपक्षिणाम्, लोमैव प्रधानं येषां तादृशानां गगनचरकाकगृद्धादीनाम्, 'समुग्गपक्खीणं' समुद्गपक्षिणाम् 'विततपक्खीणं' विततपक्षिणाम्, एतेषां विभिन्नपक्षिणामुत्पत्तिविषये तीर्थकृता एवं कथितम्। तथाहि-'तेसिं च णं अहाबीएणं अहावगासेणं' तेषां च खलु चर्मपक्षिप्रभृतिकानां यथाबीजेन यथावकाशेन इत्थीए' स्त्रियाः पुरुषस्य वा समुत्पत्ति र्भवतीति। 'जहा उरपरिसप्पाणं' यथोरः परिसर्पाणां तथैवेहाऽपि सर्वं बोध्यम्। 'णाणत्तं' आज्ञप्तम्-कथितमिति यावत् 'ते जीवा डहरा समाणा माउगात्त सिणेहमाहारेंति' ते जीवा डहराः बालाः सन्तः गर्भाद्विनिःसृता यावद्बाल्यं मातुःशरीर स्नेहमेवाऽऽहारयन्ति, 'अणुपुव्वेणं वुड्ढा वणस्सइकायं तसथावरे य पाणे' आनुपूर्व्या-क्रमशो वृद्धाः-प्रवर्द्धमानाः वनस्पतिकायमपरान् त्रसस्थावरांश्च प्राणान् आहारयन्ति। 'ते जीवा आहारेंति पुढवीसरीरं जाव संतं' ते जीवा आहारयन्ति पृथिवीशरीरं यावत् स्यात्, एतेषां भक्षणं कृत्वा तानि

तीर्थंकर भगवान् ने चर्मपक्षी (चमगादड़), लोमपक्षी (रोमों की प्रधानता वाले काक गीध आदि पक्षी), समुद्गपक्षी, विततपक्षी आदि खेचर पंचेन्द्रिय तिर्यंचों का कथन किया है। इन पक्षियों की बीज के अनुसार और अवकाश के अनुसार ही उत्पत्ति होती है। उरपरिसर्प जीवों के विषय में जो कथन किया गया है, वही सब यहां भी समझ लेना चाहिए। ये जीव जब गर्भ से बाहर आते हैं और छोटे होते हैं, तब माता के शरीर के स्नेह का आहार करते हैं! अनुक्रम से बडे होने पर वनस्पतिकाय तथा त्रस स्थावर प्राणियों का आहार करते हैं। इस प्रकार वे पृथ्वी शरीर आदि का आहार करके उसे अपने शरीर आदि

ઈત્યાદિ તીર્થંકર ભગવાને ચર્મપક્ષી (ચમગાદડ) રોમપક્ષી (રોમ-રૂંવાડાવાળા) એટલે કે કાગડા ગીધ વિગેરે) પક્ષી સમુદ્ર પક્ષી વિતત પક્ષી વિગેરે ખેચર પંચેન્દ્રિય તિર્યંચોનું કથન કરેલ છે. આ પક્ષિઓની ઉત્પત્તિ બીજ પ્રમાણે અને અવકાશ પ્રમાણે જ થાય છે. ઉરઃ પરિસર્પ જીવોના સંબંધમાં જે કથન કરવામાં આવેલ છે, તેજ સઘળું કથન અહિયાં પણ સમજી લેવું. આ જીવો જ્યારે ગર્ભમાંથી બહાર આવે છે, અને નાના હોય છે, ત્યારે માતાના શરીરના સ્નેહનો આહાર કરે છે. અનુક્રમથી મોટા થયા પછી વનસ્પતિકાય તથા ત્રસ સ્થાવર વિગેરે પ્રાણિયોનો આહાર કરે છે આ રીતે તે જીવો પૃથ્વી શરીર વિગેરેનો આહાર કરીને તેને પોતાના શરીર વિગેરે

शरीराणि स्व स्वरूपेण परिणमयन्ति, अत्रापि उरःपरिसर्पप्रकरणं द्रष्टव्यम्, 'अवरेऽवि य णं' अपराण्यपि च खलु 'तेसिं' तेषाम् 'णाणाविहाणं' नानाविधानाम् 'खचरपंचिंदियतिरिक्खजोणियाणं' खचरपञ्चेन्द्रियतिर्यग्योनिकानाम्, 'चम्मपक्खीणं' चर्मपक्षिणाम् 'जाव मक्खायं' यावल्लोमपक्षिसमुद्गवितताना माख्यातानि, तेषां पक्षिणामपराण्यपि नानावर्णरसगन्धस्पर्शयुक्तानि शरीराणि भवन्तीति तीर्थकृता प्रतिपादितानि, अन्यत्सर्वं पूर्वदिशाऽवसेयम् इति ॥सू० १५॥५७॥

मूलम्—अहावरं पुरक्खायं इहेगइया सत्ता णाणाविहजोणिया णाणाविहसंभवा णाणाविहवुक्कमा तज्जोणिया तस्संभवा तदुवक्कमा कम्मोवगा कम्मणियाणेणं तत्थ वुक्कमा णाणाविहाणं तसथावराणं पोग्गलाणं सरीरेसु वा सचित्तेसु वा अचित्तेसु वा अणुसूयत्ताए विउट्टंति, ते जीवा तेसिं णाणाविहाणं तसथावराणं पाणाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढवीसरीरं जाव संतं, अवरेऽवि य णं तेसिं तसथावरजोणियाणं अणुसूयगाणं सरीरा णाणावण्णा जाव मक्खायं। एवं दुरूवसंभवत्ताए, एवं खुरदुगत्ताए ॥सू० १६।५८॥

छाया—अथाऽपरं पुराख्यातमिहैके सत्त्वाः नानाविधयोनिकाः नानाविधसम्भवाः नानाविधव्युत्क्रमाः, तद्योनिका स्तत्सम्भवा स्तदुपक्रमाः कर्मोपगाः कर्मनिदानेन तत्र व्युत्क्रमाः, नानाविधानां त्रसस्थावराणां पुद्गलानां शरीरेषु वा सचित्तेषु वा अचित्तेषु वा अनुस्यूततया विवर्तन्ते, ते जीवा स्तेषां नानाविधानां त्रसस्थावराणां

के रूप में परिणत करते हैं। यह सब कथन भी उरःपरिसर्प के कथन के अनुसार ही समझना चाहिए। इन चर्मपक्षियों, लोमपक्षियों, समुद्गपक्षियों के अर्थात् खेचर पंचेन्द्रिय तिर्यंचों के नाना वर्ण, रस, गंध और स्पर्श वाले अनेक शरीर तीर्थंकर भगवान् ने कहे हैं ॥१५॥

રૂપે પરિણમાવે છે આ સઘળું કથન પણ ઉરઃપરિસર્પના કથન પ્રમાણે જ સમજી લેવું જોઇએ. આ ચર્મ પક્ષિયો, લોમ પક્ષિયો, સમુદ્ગ પક્ષિયો તથા વિતત પક્ષિયોના અર્થાત્ ખેચર પંચેન્દ્રિય તિર્યંચોના અનેક વર્ણ; રસ ગંધ અને સ્પર્શવાળા અનેક શરીરો તીર્થંકર ભગવાને કહ્યા છે. ॥સૂ૦ ૧૫॥

प्राणानां स्नेहमाहारयन्ति । ते जीवा आहारयन्ति पृथिवीशरीरं यावत् स्यात् । अपराण्यपि च खलु तेषां त्रसस्थावरयोनिकानामनुद्भूतकानां शरीराणि नानावर्णानि यावदाख्यातानि । एवं दूरूपसम्भवतया एवं चर्मकीटतया सू० १६-५८॥

टीका—पञ्चेन्द्रियप्राणिनां स्वरूपं दर्शयित्वा-विकलेन्द्रियस्वरूपमाह-'अहावरं' इत्यादि । ये जीवास्त्रसस्थावराणां सचित्ताऽचित्तदेहेषु समुत्पद्य तान्याश्रित्य स्थितिमन्तो भवन्ति-वर्द्धन्ते च, तेषां जीवानां विकलेन्द्रियाणामिह प्रकरणे निरूपणं भवति । 'अहावरं' अथाऽपरम् 'पुरक्खायं' पुराख्यातं तीर्थकरेण, पूर्वस्मिन् काले तीर्थकरा अन्यविधजीववर्णनं कृतवन्तः, 'इहेगइया सत्ता णाणाविहजोणिया' इहैकतये सत्त्वा यूकालिक्षादयो जीवाः नानाविधयोनिकाः-अनेकप्रकारकयोनिषु समुत्पद्यमाना भवन्ति 'णाणाविहसंभवा' नानाविधसम्भवाः, तथाऽनेकप्रकारकयोनिषु स्थिता भवन्ति । 'णाणाविहवुक्कमा' नानाविधव्युत्क्रमाः अनेकप्रकारकयोनिष्वेव विवर्द्धन्ते । 'तज्जोणिया तत्संभवा तद्वुक्कमा' तद्योनिकास्त-

---

'अहावरं पुरक्खायं' इत्यादि ।

टीकार्थ—पंचेन्द्रिय जीवों का स्वरूप दिखला कर अब विकलेन्द्रिय जीवों का स्वरूप कहते हैं । जो जीव त्रस और स्थावर प्राणियों के सचित्त और अचित्त शरीरों में उत्पन्न होकर उन्हीं के आश्रय में रहते हैं और बढते हैं, उन्हीं विकलेन्द्रिय जीवों का यहां निरूपण किया गया है ।

पूर्वकाल में तीर्थंकरों ने अन्य प्रकार के प्राणियों का भी कथन किया है । कोई कोई जीव, जैसे जूं, लीख आदि अनेक प्रकार की योनियों वाले होते हैं । वे अनेक प्रकार की योनियों में उत्पन्न होते हैं,

---

'अहावरं पुरक्खायं' ઇત્યાદિ

ટીકાર્થ—પંચેન્દ્રિય જીવોનું સ્વરૂપ બતાવીને હવે વિકલેન્દ્રિય જીવોનું સ્વરૂપ બતાવવામાં આવે છે.-જે જીવ ત્રસ અને સ્થાવર પ્રાણિયેાના સચિત્ત અને અચિત્ત શરીરેામાં ઉત્પન્ન થઈને તેઓના જ આશ્રયથી રહે છે. અને વધે છે. તે વિકલેન્દ્રિય જીવેાનું અહિયાં નિરૂપણ કરવામાં આવે છે.

પૂર્વકાળમાં તીર્થંકરેાએ અન્ય પ્રકારના પ્રાણિયેાનું પણ કથન કરેલ છે. કેાઈ કેાઈ જીવ જેમકે જૂ લીખ, વિગેરે અનેક પ્રકારની યેાનિયેાવાળા હેાય છે તેઓ અનેક પ્રકારની યેાનિયેામાં ઉત્પન્ન થાય છે. અનેક પ્રકારની યેાનિયેામાં સ્થિત રહે છે, અને અનેક પ્રકારની યેાનિયેામાં વધે છે. અને પેાત-

स्संभवात्तदुपक्रमाः यूकादि जीवाः 'कम्मोवगा' कर्मोपगाः-पूर्वकृतकर्मानुगामिनः सन्तः 'कम्मनियाणेणं' कर्मनिदानेन-कर्मनिमित्तेन 'तत्थ वुक्कमा' तत्र व्युत्क्रमाः-अनेकप्रकारकयोनिषु समुत्पन्नास्तत्रैव स्थिताः तत्रैव वृद्धिं प्राप्तवन्तः स्वकृतकर्मानुगामिनः कर्मबलादेव अनेकविधयोनिषु जायन्ते। 'णाणाविहाणं तसथावराणं पोग्गलाणं' नानाविधानां त्रसस्थावराणां पुद्गलानाम् 'सरीरेसु वा सचित्तेसु वा अचित्तेसु वा' शरीरेषु वा-सचित्तेषु वा अचित्तेषु वा 'अणुसूयत्ताए विउट्टंति' अनुस्यूततया विवर्त्तन्ते-ते जीवा अनेकप्रकारकत्रसस्थावराणां सचित्ताऽचित्तदेहेषु आश्रिताः समुत्पद्यन्ते। 'ते जीवा तेसिं णाणाविहाणं तसथावराणं पाणाणं सिणेहमाहारेंति' ते यूकादयो जीवाः तेषां नानाविधानां त्रसस्थावराणां प्राणिनां स्नेहमाहारयन्ति, 'ते जीवा आहारेंति पुढवीसरीरं जाव संतं' ते यूकादयो जीवा आहारयन्ति पृथिवीशरीरं यावत् स्यात्, ते पृथिव्यादि जीवानामपि शरीराणि भक्षयन्ति भक्षयित्वा च कालेन स्वस्वरूपे परिणमयन्ति, 'अवरेऽवि य णं' अपराण्यपि च खलु 'तेसिं' तेषाम् 'तसथावरजोणियाणं' त्रसस्थावरयोनिकानाम्-यूकादिविकलेन्द्रियजीवानाम् 'अणुसूयगाणं' अनुस्यूतकानाम्-तदाश्रिततया स्थितिकानाम् 'सरीरा' शरीराणि 'णाणावण्णा' नानावर्णानि 'जाव मक्खायं' यावदाख्यातानि 'एवं दुरूवसंभवत्ताए' एवं दूरूपसम्भवतया-अनेनैव प्रकारेण मूत्रपुरीषेभ्योऽपि विकलेन्द्रिय

अनेक प्रकार की योनियों में स्थित होते हैं और अनेक प्रकार की योनियों में बढते हैं। अपने अपने पूर्वकृत कर्मानुगामी होकर कर्म के अनुसार ही वहां उनकी उत्पत्ति, स्थिति और वृद्धि होती है। वे नाना प्रकार के त्रस और स्थावर जीवों के सचित्त और अचित्त कलेवरों में उत्पन्न होते हैं और अनेक विध त्रस स्थावर प्राणियों के स्नेह का आहार करते हैं। वे जू आदि विकलेन्द्रिय जीव उनके शरीरों का भी आहार करते हैं और उन्हें अपने शरीर के रूप में परिणत कर लेते है। उनके नाना वर्ण आदि से युक्त अनेक प्रकार के शरीर होते हैं। इसी

પોતાના પૂર્વોક્ત કર્માનુગામી થઈને કર્મ પ્રમાણે જ ત્યાં તેઓની ઉત્પત્તિ, સ્થિતિ અને વૃદ્ધિ થાય છે. તેઓ અનેક પ્રકારના ત્રસ અને સ્થાવર જીવોના સચિત્ત અને અચિત્ત કલેવરો (શરીરો) માં ઉત્પન્ન થાય છે. અને અનેક પ્રકારના ત્રસ અને સ્થાવર .પ્રાણિયોના સ્નેહનો આહાર કરે છે તે જૂં વિગેરે વિકલેન્દ્રિય જીવો તેઓના શરીરોનો પણ આહાર કરે છે. અને તેને પોતાના શરીરના રૂપમાં પરિણુમાવે છે. તેમના અનેક વર્ણ વિગેરેથી યુક્ત અનેક પ્રકારના

जीवा जायन्ते 'एवं खुरदुगत्ताए' एवं चर्मकीटतया-अनेनैव प्रकारेण गोमहिषादिशरीरेष्वपि चर्मकीटतया बहवो जीवाः समुत्पद्यन्ते विकलेन्द्रियाः स्वकर्मकृतपापफलभोगायेति ॥सू०१६-५८॥

मूलम्—अहावरं पुरक्खायं इहेगइया सत्ता णाणाविहजोणिया जाव कम्मणियाणेणं तत्थ वुक्कमा णाणाविहाणं तसथावराणं पाणाणं सरीरेसु सचित्तेसु वा अचित्तेसु वा तं सरीरगं वायसंसिद्धं वा वायसंगहियं वा वायपरिग्गहियं वा उड्ढवाएसु उड्ढभागी भवइ अहे वाएसु अहेभागी भवइ तिरियवाएसु तिरियभागी भवइ, तं जहा—ओसा हिमए महिया करए हरतणुए सुद्धोदए, ते जीवा तेसिं णाणाविहाणं तसथावराणं पाणाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढविसरीरं जाव संतं, अवरेऽवि य णं तेसिं तसथावरजोणियाणं ओसाणं जाव सुद्धोदगाणं सरीरा णाणावण्णा जाव मक्खायं।

अहावरं पुरक्खायं इहेगइया सत्ता उदगजोणिया उदगसंभवा जाव कम्मणियाणेणं तत्थ वुक्कमा तसथावरजोणिएसु उदएसु उदगत्ताए विउट्टंति, ते जीवा तेसिं तसथावरजोणियाणं उदगाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढविसरीरं जाव संतं, अवरेऽवि य णं तेसिं तसथावरजोणियाणं उदगाणं सरीरा णाणावण्णा जाव मक्खायं।

प्रकार मल मूत्र से भी विकलेन्द्रिय जीवों की उत्पत्ति होती है। गाय भैंस आदि के शरीर में भी चर्मकीट रूप में बहुत से विकलेन्द्रिय जीव उत्पन्न होते हैं और अपने कर्मों का फल भोगते हैं ॥१६॥

શરીરો હોય છે. એજ પ્રમાણે મલ, મૂત્રથી પણ વિકલેન્દ્રિય જીવોની ઉત્પત્તિ થાય છે. ગાય, ભેંસ વિગેરેના શરીરમાં પણ ચર્મકીટ પણાથી ઘણા એવા વિકલેન્દ્રિય જીવો ઉત્પન્ન થાય છે. અને પોતાના કર્મોનું ફળ ભોગવે છે. ॥સૂ૦૧૬॥

अहावरं पुरक्खायं इहेगइया सत्ता उदगजोणियाणं जाव कम्मनियाणेणं तत्थ वुक्कमा उदगजोणिएसु उदएसु उदगत्ताए विउट्टंति, ते जीवा तेसिं उदगजोणियाणं उदगाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढवीसरीरं जाव संतं, अवरेऽवि य णं तेसिं उदगजोणियाणं उदगाणं सरीरा णाणावण्णा जाव मक्खायं। अहावरं पुरक्खायं इहेगइया सत्ता उदगजोणियाणं जाव कम्मनियाणेणं तत्थ वुक्कमा उदगजोणिएसु उदएसु तसपाणत्ताए विउट्टंति, ते जीवा तेसिं उदगजोणियाणं उदगाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढवीसरीरं जाव संतं, अवरेऽवि य णं तेसिं उदगजोणियाणं तसपाणाणं सरीरा णाणावण्णा जाव मक्खायं ॥सू० १७।५७॥

छाया—अथाऽपरं पुराख्यातम् इहैकतये सत्त्वाः नानाविधयोनिका यावत् कर्मनिदानेन तत्र व्युत्क्रमाः नानाविधाना त्रसस्थावराणां प्राणानां शरीरेषु सचित्तेषु वा अचित्तेषु वा तच्छरीरं वातसंसिद्धं वा वातसंगृहीतं वा वातपरिगृहीतं वा ऊर्ध्ववातेषु ऊर्ध्वभागी भवति, अधोवातेषु अधोभागी भवति, तिर्यग्वातेषु तिर्यग्भागी भवति तद्यथा—अवश्यायः हिमकः महिका करकः हरतनुकः शुद्धोदकम्, ते जीवा स्तेषां नानाविधानां त्रस स्थावराणां प्राणानां स्नेहमाहारयन्ति, ते जीवा आहारयन्ति पृथिवीशरीरं यावत् स्यात्। अपराण्यपि च खलु तेषां त्रसस्थावरयोनिकानाम् अवश्यायानां यावच्छुद्धोदकानां शरीराणि नानावर्णानि यावदाख्यातानि।

अथाऽपरं पुराख्यातम् इहैकतये सत्त्वाः उदकयोनिकाः उदकसम्भवा यावत् कर्मनिदानेन तत्र व्युत्क्रमाः त्रसस्थावरयोनिकेषु उदकेषु उदकतया विवर्तन्ते। ते जीवा स्तेषां त्रसस्थावरयोनिकानामुदकानां स्नेहमाहारयन्ति, ते जीवा आहारयन्ति पृथिवीशरीरं यावत् स्यात्, अपराण्यपि च खलु तेषां त्रसस्थावरयोनिकानामुदकानां शरीराणि नानावर्णानि यावदाख्यातानि।

अथाऽपरं पुराख्यातम् इहैकतये सत्त्वाः उदकयोनिकानां यावत्कर्मनिदानेन तत्र व्युत्क्रमाः उदकयोनिकेषूदकेषु उदकतया विवर्तन्ते। ते जीवा स्तेषामुदक-

योनिकानामुदकानां स्नेहमाहारयन्ति । ते जीवा आहारयन्ति पृथिवीशरीरं यावत् स्यात् । अपराण्यपि च खलु तेषाम् उदकयोनिकानामुदकानां शरीराणि नानावर्णानि यावदाख्यातानि । अथाऽपरं पुराख्यातम् इहैकतये सत्त्वाः उदकयोनिकानां यावत् कर्मनिदानेन तत्र व्युत्क्रमाः उदकयोनिकेषूदकेषु त्रसप्राणतया विवर्त्तन्ते । ते जीवा स्तेषामुदकयोनिकानामुदकानां स्नेहमाहारयन्ति, ते जीवाः आहारयन्ति पृथिवीशरीरं यावत् स्यात् अपराण्यपि च खलु तेषामुदकयोनिकानां त्रसप्राणानां शरीराणि नानावर्णानि यावदाख्यातानि ॥सू० १७-५७॥

टीका—'इह खलु संसारे-अनेके जीवाः पूर्वकृतकर्मवशगा, वायुयोनिका अप्काये समुत्पद्यन्ते, यथा-अवश्याय हिमक महिकादयः, तेषामेव जीवानामिह प्रकरणे स्वरूपं निरूप्यते । 'अहावरं पुरक्खायं' अथाऽपरं पुराख्यातम्, तीर्थकरेणेति शेषः, 'इहे गइया' इहैकतये 'सत्ता' सत्त्वाः-प्राणिनः 'णाणाविहजोणिया' नानाविधयोनिकाः-अनेकप्रकारकयोनिषु समुत्पन्नाः सन्तः 'जाव' यावत् 'कम्मणियाणेण तत्थ वुक्कमा' कर्मनिदानेन तत्र व्युत्क्रमाः-स्वकृतकर्मनिमित्तेन तत्र-वायुयोनिकाऽप्काये समुत्पन्ना स्तत्रैव स्थिता स्तत्रैव वर्द्धनशीलाः, वायुयोनिकाऽप्काये समुत्पद्यन्ते जीवाः 'णाणाविहाणं तसथावराणं पाणाणं' नानाविधानां त्रसस्थावराणां प्राणानाम्, तत्र मण्डूकादयस्त्रसाः, लवणहरितादयः स्थावरास्तेषां प्राणिनाम्

'अहावरं पुरक्खायं' इत्यादि ।

टीकार्थ—इस संसार में अनेक जीव पूर्वकृत कर्मके अधीन होकर वायुयोनिक अप्काय में उत्पन्न होते हैं, जैसे अवश्याय महिका आदि इस प्रकरण में उन्हीं का स्वरूप कहा जाएगा ।

तीर्थंकर भगवान् ने कहा है कि इस लोक में कोई कोई जीव विविध प्रकार की योनियों में उत्पन्न होते हुए कर्म के उदय से वायुयोनिक अप्काय में आते हैं। वे वहीं स्थित होते और वृद्धि को प्राप्त

'अहावरं पुरक्खायं' ઇત્યાદિ

ટીકાર્થ—આ સંસારમાં અનેક જીવો પહેલાં કરેલા કર્મને આધીન થઈને વાયુયોનિક અપ્કાયમાં ઉત્પન્ન થાય છે, જેમકે—અવશ્યાય મહિકા ઝાકળ આદિ આ પ્રકરણમાં તેઓના વિશેજ કથન કરવામાં આવશે

તીર્થંકર ભગવાને કહ્યું કે—આ લોકમાં કોઈ કોઈ જીવો અનેક પ્રકારની યોનિયોમાં ઉત્પન્ન થતા થકા કર્મના ઉદયથી વાયુયોનિક અપ્કાયમાં આવે છે. તેઓ ત્યાજ સ્થિત હોય છે. અને વૃદ્ધિ પામે છે. તેઓ ત્રસ અને

'सरीरेसु सचित्तेसु वा अचित्तेसु वा' शरीरेषु सचित्तेषु वा अचित्तेषु वा वायुयोनिकाप्कायरूपेण समुत्पद्यन्ते। 'तं सरीरगं वायसंसिद्धं वा वायसंगहियं वा, वायपरिग्गहियं वा' तच्छरीरं वातसंसिद्धं वा वातेन निष्पन्नं वा, वात संगृहीतं वा वातपरिगृहीतं वा, तदप्कायशरीर वायुना उत्पादितं सोऽप्कायो वात जनित इत्यर्थः अतोऽप्कायस्योपादानकारणं वायुरेव, वायुना तद्द्वारेण संगृहीतं वायुद्वारेणैव धारितमपि भवति। अत एव-'उड्ढवाएसु उड्ढभागी भवइ, अहेवाएसु अहेभागी भवइ, तिरियवाएसु तिरियभागी भवइ' तदप्कायशरीरम् ऊर्ध्ववातेषु ऊर्ध्वभागि भवति, अधोवातेषु अधोभागि भवति, तिर्यग्वातेषु तिर्यग्भागि भवति, इत्यादि, एवमग्रेऽपि-वायुकारणकं तच्छरीरमिति निर्णीयते। 'तं जहा' तद्यथा-'ओसा' अवश्यायः-'ओस' इति लोके प्रसिद्धम् 'हिमए' हिमकः 'हिमम्' इति लोकप्रसिद्धम्, 'महिया' महिका-अल्पजलवृष्टिर्जलतुषारश्च 'करए' 'करकः-कठिनमेघोदकम् 'ओला' इति प्रसिद्धम् 'हरतणुए' हरतनुकः-दूर्वा-यवादि

होते हैं। वे त्रस और स्थावर प्राणियों के सचित्त और अचित्त शरीरों में अप्काय रूप से उत्पन्न होते हैं। उनका शरीर वायुकाय से बना हुआ और वायुकाय के द्वारा संगृहीत होता है। वायुकाय ही उनके शरीर को धारण करता है। इसी कारण अप्काय का वह शरीर वायु के ऊपर जाने पर ऊंचा जाता है, वायु के नीचे जाने पर नीचे जाता है और वायु के तिर्छे जाने पर तिर्छा जाता है। इससे यह निर्णय होता है कि अप्काय का वह शरीर वायुकारणक होता है। वायुयोनिक अप्काय के जीव ये हैं। ओस, हिम, महिका अर्थात् पांच रंग की धूमिका (घूंवर), ओला, हरतनुक (धान्य के पौधों पर विद्यमान जलबिन्दु) शुद्धोदक

સ્થાવર પ્રાણિયેાના સચિત્ત અને અચિત્ત શરીરેામાં અપ્કાય પણાથી ઉત્પન્ન થાય છે તેઓના શરીરેા વાયુકાયથી બનેલા અને વાયુકાય દ્વારા ગ્રહણ કરાયેલા હેાય છે. વાયુકાય જ તેઓના શરીરેાને ધારણ કરે છે એજ કારણે અપ્કાયનાં તે શરીરેા વાયુ ઉપર જતાં ઉચે જાય છે. અને વાયુ નીચે જાય ત્યારે નીચે જાય છે. અને વાયુ તિર્છા જાય ત્યારે તિર્છા-(વાંકા ચુંકા) જાય છે. આનાથી એ નિર્ણય થાય છે કે-અપ્કાયનુ તે શરીર વાયુ કારણક વાળું હેાય છે. વાયુયેાનિક અપ્કાયના જીવેા આ છે-ઓસ, હીમ, મહિકા (ધુમ્મસ) અર્થાત્ પાંચ રંગની ધૂમિકા ઓલા હરતનુક (અનાજના ફૂલેા પર રહેનારા જલબિંદુ)

धान्योपरि क्षिप्यमानं जलादिबिन्दु', 'सुद्धोदए' शुद्धोदकम्-सामान्यजलम्, 'ते जीवा तेसिं णाणाविहाणं तसथावराणं पाणाणं खिणेहमाहारेंति' ते-वायुयोनिका अप्कायिका स्तेषां नानाविधानां त्रसस्थावराणां प्राणानां स्निग्धमात्रमाहारयन्ति। 'ते जीवा आहारेंति पुढवीसरीरं जाव संतं' ते जीवा आहारयन्ति पृथिवीशरीरं यावत्स्यात्, तेषां शरीरमचित्तं कुर्वन्ति विनष्टं तच्छरीरं पूर्वाद्याहारितं विपरिणामितम् आत्मसात्स्वरूपं कृतं भवति, 'अवरे वि य णं' अपराण्यपि च खलु 'तेसिं उसथावरजोणियाणं ओसाणं जाव सुद्धोदगाणं सरीरा णाणावण्णा जाव मक्खायं' तेषां त्रसस्थावरयोनिकानामवश्यायानां हिमसहिकाकरकहरतनुकानां शुद्धोदकानां शरीराणि नानावर्ण-रसगन्धस्पर्शयुक्तानि भवन्तीति आख्यातानि भगवता तीर्थंकृतेति।

वायुयोनिकाऽप्कायान्-जीवानुपदर्श्य अप्योनिकान् अप्कायदेहोत्पन्नान्-अप्कायान् जीवान दर्शयितुमाह-'अहावरं' इत्यादि। 'अहावरं पुरक्खायं' अथाऽपरं पुराख्यातम् 'इहेगइया सत्ता' इहैकतये सत्त्वाः-इह-अस्मिन् लोके सत्त्वाः-जीवाः 'उदगजोणिया' उदकयोनिकाः-उदकं-जलमेव विद्यते योनिः-उत्पत्ति-

---

(सामान्य जल) से वायुयोनिक अप्काय के जीव नाना प्रकार के त्रस और स्थावर प्राणियों के स्नेह (रस) का आहार करते हैं। पृथ्वीकाय आदि के शरीरों का भी आहार करते हैं। उनके शरीर को अचित्त बना देते हैं और वह उनके शरीर के रूप में परिणत हो जाता है। उन ओस यावत् शुद्धोदक जीवोंके शरीर नाना वर्ण, रस, गंध और स्पर्श से युक्त होते हैं, ऐसा तीर्थंकर भगवान् ने कहा है। 'अहावरं पुरक्खायं' इत्यादि।

वायुयोनिक अप्काय जीवों का स्वरूप दिखला कर अप्काययोनिक अप्काय के जीवों का निरूपण करते हैं। इस संसार में कोई कोई अप्काय के जीव अप्कायथोनिक होते हैं। उनकी अप्काय से

શુદ્ધોદક (સામાન્ય જલ) આ બધા વાયુયોનિક અપ્કાયના જીવો અનેક પ્રકારના ત્રસ અને સ્થાવર પ્રાણિયોના સ્નેહ-(રસ) નો આહાર કરે છે પૃથ્વીકાય વિગેરેના શરીરોનો પણ આહાર કરે છે. તેમના શરીરોને અચિત્ત બનાવી દે છે. અને તે તેના શરીર રૂપે પરિણત થઈ જાય છે. તે ઓસ યાવત શુદ્ધોદક સુધીના જીવોના શરીરો અનેક વર્ણ, રસ, ગંધ, અને સ્પર્શથી યુક્ત હોય છે એ પ્રમાણે તીર્થંકર ભગવાને કહ્યું છે.

'अहावरं पुरक्खायं' ઇત્યાદિ

વાયુયોનિક અપ્કાયનું સ્વરૂપ બતાવીને હવે અપ્કાય યોનિવાળા અપ્કાયના જીવનું નિરૂપણ કરવામાં આવે છે. આ સંસારમાં કોઇ કોઈ અપ્કાયના જીવો અપ્કાય યોનિવાળા હોય છે. તેઓની ઉત્પત્તિ અપ્

कारणं येषां ते तादृशजीवाः 'उदगसंभवा' उदकसम्भवाः-उदके स्थितिमन्तः 'जाव' यावत् 'कम्मनियाणेणं तत्थ वुक्कमा' कर्मनिदानेन-स्वकृतकर्मनिमित्तेन-स्वकर्मवशगाः सन्तः तत्र-उदके व्युत्क्रमाः-प्रवर्द्धमानास्ते जीवाः 'तसथावरजोणिएसु उदगत्ताए विउट्टंति' त्रसस्थावरयोनिकेषु उदकेषूदकतया-उदकस्वरूपेण विवर्त्तन्ते-समुत्पद्यन्ते। 'ते जीवा तेसिं तसथावरजोणियाणं उदगाणं सिणेहमाहारेंति' ते-उदयोनिका जीवा त्रसस्थावरयोनिकानाम् उदकानां स्नेहमाहारयन्ति-स्नेहभावमाहारयन्ति, 'ते जीवा आहारेंति पुढवीसरीरं जाव संतं' ते जीवाः पृथिवीकायादीनां शरीरमपि आहारयन्ति, आहार्य च स्वरूपे परिणमयन्ति। 'अवरे वि य णं तेसिं तसथावरजोणियाणं उदगाणं सरीरा णाणावण्णा जाव मक्खायं' तेषां त्रसस्थावरयोनिकानामुदकानामपराण्यपि च खलु शरीराणि नानावर्णरसगन्धस्पर्शवन्ति भवन्तीति तीर्थकृताऽऽख्यातानि-प्रतिपादितानि।

'अहावरं पुरक्खायं' अथाऽपरं पुराख्यातम्, पुनराह-उदकसम्भवा उदकयोनिका उदकव्युत्क्रमाः, तत्सम्भवा स्तद्योनिका स्तदुपक्रमाः कर्मवशगाः 'इहेगइया सत्ता'

उत्पत्ति होती है, अप्काय में स्थिति होती है और अप्काय में ही वृद्धि होती है। अपने कर्म के वशीभूत होकर वे जीव त्रस और स्थावर योनिक, जल में जल रूप से उत्पन्न होते हैं। वे अप्योनिक अप्काय जीव त्रस स्थावर योनिक उदक के स्नेह का आहार करते हैं। तथा पृथ्वी आदि के शरीर का भी आहार करते हैं और उसे अपने शरीर के रूप में परिणत करते हैं। इन जीवों के नाना वर्ण, रस, गंध और स्पर्श वाले अनेक प्रकार के शरीर होते हैं, ऐसा तीर्थंकर भगवान् ने कहा है।

तीर्थंकर भगवान् ने अन्य प्रकार के जीव भी कहे हैं। वे जीव उदकयोनिक उदक में उदक रूप से अपने कर्मों के वशीभूत होकर

કાયથી થાય છે. અપ્કાયમાં સ્થિત થાય છે. અને અપ્કાયમાં જ વૃદ્ધિ થાય છે. પોતાના કર્મને વશ થઈને તે જીવો ત્રસ અને સ્થાવર યોનિવાળા જળમાં જળ રૂપે ઉત્પન્ન થાય છે. તેઓ અપ્ યોનિક અપ્કાયના જીવો ત્રસ અને સ્થાવર યોનિવાળા પાણીના સ્નેહનો આહાર કરે છે. તથા પૃથ્વી વિગેરેના શરીરોનો પણ આહાર કરે છે. અને તેને પોતાના શરીરના રૂપથી પરિણમાવે છે. આ જીવોના અનેક વર્ણ, રસ, ગંધ, અને સ્પર્શવાળા અનેક પ્રકારના શરીરો હોય છે. આ પ્રમાણે તીર્થંકર ભગવાને કહેલ છે.

તીર્થંકર ભગવાને બીજા પ્રકારના જીવો પણ કહ્યા છે. તે જીવો ઉદક યોનિવાળા, પાણીમાં પાણીના રૂપથી પોતાના કર્મોને વશ થઈને ઉત્પન્ન

उदकयोनिकेषूदकेषु त्रसपायतया विवर्त्तन्ते । तिष्ठन्त्यस्मिन्लोकेऽनेके जीवाः स्वकृतपुराकृतकर्मवशगाः सन्तो वसन्त उदकयोनिकेषूदकेषु समागतवन्तस्तत्र-उदकयोनिकेषु उदकेषु त्रसजीवरूपेण समुत्पन्नाः। 'ते जीवा तेसिं उदगजोणियाणं उदगाणं सिणेहमाहारेंति' ते-उदकयोनिका जीवा स्तेषामेव उदकयोनिकानामुदकानां स्नेहमाहारयन्ति-स्नेहं-स्निग्धभावमाहारयन्ति । 'ते जीवा आहारयन्ति पुढवीसरीरं जाव संतं' ते जीवा आहारयन्ति पृथिवीशरीरं यावत्स्यात् । 'ते-उदकयोनिका उदके स्थिताः त्रसजीवाः पृथिव्यादीनामपि शरीर भक्षयन्ति, 'अवरे वि य णं तेसिं उदगजोणियाणं तसपाणाणं सरीरा णाणावण्णा जाव मक्खायं' अपराण्यपि च खलु तेषामुदकयोनिकानां त्रसप्राणानां शरीराणि नानावर्णानि यावदाख्यातानि, नानावर्णगन्धरसस्पर्शयुक्तानि भवन्तीति तीर्थकृता आख्यातानि प्रतिपादितानि ॥ सू० १७-१९॥

मूलम्-अहावरं पुरक्खायं इहेगइया सत्ता णाणाविहजोणिया जाव कम्मणियाणेणं तत्थ वुक्कमा णाणाविहाणं तसथावराणं पाणाणं सरीरेसु सचित्तेसु वा अचित्तेसु वा अगणिकायत्ताए विउट्टंति ते जीवा तेसिं णाणाविहाणं तसथावराणं पाणाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढविसरीरं जाव संतं, अवरेऽवि य णं तेसिं तसथावरजोणियाणं अगणीणं सरीरा णाणावण्णा जाव मक्खायं, सेसा तिन्नि आलावगा जहा उदगाणं । अहावरं पुरक्खायं इहेगइया सत्ता णाणाविहजोणियाणं जाव कम्मणियाणेणं तत्थ वुक्कमा, णाणाविहाणं तसथावराणं

होते हैं। वे जीव उदकयोनिक उदक के स्नेह का आहार करते हैं। वे पृथ्वी आदि के शरीर का भी आहार करते हैं। उन उदकयोनिक त्रस प्राणियों के नाना वर्ण रस गंध स्पर्श वाले नाना शरीर होते हैं। ऐसा तीर्थंकर भगवान् ने कहा है ॥१७॥

ઉદકના સ્નેહનો આહાર કરે છે. તેઓ પૃથ્વી વિગેરેના શરીરનો પણ આહાર કરે છે. તે ઉદકયોનિક ત્રસ પ્રાણિયોના અનેક વર્ણ, ગંધ, રસ અને સ્પર્શવાળા અનેક શરીરો હોય છે. એ પ્રમાણે તીર્થંકર ભગવાને કહ્યું છે. ॥સૂ૦ ૧૭॥

युध्यमानानां पञ्चेन्द्रियहस्तिमहिषादीनां दन्तशृङ्गादिषु, अचित्तेषु वा घर्षिताऽस्थिपस्तरादौ अग्निकायतया विवर्त्तन्ते-अग्निकायरूपेण समुत्पद्यन्ते, इति प्रत्यक्षप्रमाणम्। इह लोके कियन्तो जीवाः पूर्वभवे नानाविधयोनिषु समुत्पद्य, तत्र सम्पादितकर्मबलेनाऽनेकप्रकारकत्रसस्थावराणां सचित्ताऽचित्तदेहेषु-अग्निकायस्वरूपेण समुत्पद्यन्ते इत्यर्थः। 'ते जीवा तेसिं णाणाविहाणं तसथावराणं पाणाणं सिणेहमाहारेंति' ते जीवास्तेषां नानाविधानां त्रसस्थावराणां प्राणानां स्नेहमाहारयन्ति। अनेकप्रकारकत्रसादिजीवानां स्नेहभावमाहारयन्ति, 'ते जीवा आहारेंति पुढवीसरीरं जाव संतं' ते जीवा आहारयन्ति पृथिवीशरीरं यावत्स्यात्-पृथिव्यादीनां शरीरमपि आहारयन्ति आहार्य च तानि शरीराणि स्वस्वरूपे परिणमयन्ति। 'अवरेऽवि य णं तेसिं तसथावरजोणियाणं अगणीणं सरीरा णाणावण्णा जाव मक्खायं' तेषां त्रसस्थावरयोनिकानामग्निकायानां जीवानाम् अपराण्यपि च खलु शरीराणि नानावर्णादियुक्तानि भवन्तीति तीर्थकृताऽऽख्यातानि। 'सेसा तिन्नि आलावगा जहा उदगाणं' शेषास्त्रय आलापका यथा उदकानाम्। तथाहि-यथा वायुयोनिका अप्कायाः १, उदकयोनिका उदकजीवाः २, उदकयोनिकाः

सचित्त शरीरों मे तथा घिसे हुए पाषाण आदि अचित्त शरीरों में अग्निकाय के रूप में उत्पन्न होते हैं। वे जीव अनेक प्रकार के त्रस और स्थावर प्राणियों के स्नेह रस का आहार करते हैं और पृथ्वी आदि के शरीरों का भी आहार करते हैं और उस आहार को अपने शरीर के रूप में परिणत करते हैं। उन अनेक त्रस स्थावरयोनिक अग्निकाय के जीवों के ओर भी नाना वर्ण, रस, गंध और स्पर्श वाले शरीर होते हैं, ऐसा तीर्थंकर भगवान् ने कहा है।

शेष तीन आलापक उदक जीवों के समान समझना चाहिए। अर्थात् जैसे वायुयोनिक अप्काय, उदकयोनिक उदकजीव, उदकयोनिक त्रस

રોમાં તથા ઘસવામાં આવેલા પત્થર વિગેરે અચિત્ત પદાર્થોમાં અગ્નિકાય પણાથી ઉત્પન્ન થાય છે તે જીવો અનેક પ્રકારના ત્રસ અને સ્થાવર પ્રાણીયોના સ્નેહ રસનો આહાર કરે છે. અને પૃથ્વી વિગેરેના શરીરોનો પણ આહાર કરે છે. અને તે આહારને પોતાના શરીર રૂપે પરિણમાવી દે છે તે અનેક ત્રસ અને સ્થાવર યોનિવાળા અગ્નિકાયના જીવોના બીજા પણ અનેક વર્ણ ગંધ રસ અને સ્પર્શ વાળા શરીરો હોય છે. એ પ્રમાણે તીર્થંકર ભગવાને કહ્યું છે.

બાકીના ત્રણ આલાપકો ઉદક-પાણીના જીવો પ્રમાણે સમજી લેવા. અર્થાત્ જેમ વાયુયોનિવાળા, અપ્કાય ઉદકયોનિક ઉદકજીવો, ઉદકયોનિક ત્રસ જીવો

त्रसजीवाः३, तथा वायुयोनिका अग्निकायाः१, अग्नियोनिका अग्निकायाः२, अग्नियोनिकास्त्रसजीवाः३, एवं क्रमेण शेषास्त्रय आलापका ज्ञातव्या इति। सम्प्रति वायुकायमाह-'अहावरं पुरक्खायं' अथाऽपरं पुराख्यातम् 'इहेगइया सत्ता णाणाविहजोणियाणं जाव' इहैकतये सत्त्वाः-जीवाः नानाविधयोनिकानां यावत् 'कम्मणियाणेणं' कर्मनिदानेन 'तत्थ वुक्कमा' तत्र व्युत्क्रमाः- तत्रैव प्रवर्धमानाः, 'णाणाविहाणं तसथावराणं पाणाणं' नानाविधानां त्रसस्थावराणां प्राणानाम्, सरीरेसु सचित्तेसु वा अचित्तेसु वा वाउकायत्ताए' शरीरेषु सचित्तेषु वा अचित्तेषु वा वायुकायतया 'विउट्टंति' विवर्त्तन्ते, इहलोके कियन्तो जीवाः पूर्वभवेऽनेकप्रकारकयोनिषु समुत्पद्य तत्र स्वकृतकर्मबलेन त्रसस्थावरजीवानां सचित्ताऽचित्तशरीरेषु वायुकायतया समुत्पद्यन्ते, 'जहा अगणीणं तहा भाणियव्वा चत्तारि गमा' यथाऽग्नीनां तथाऽत्रापि चत्वार आलापका भणितव्याः-प्रकाशनीयाः। वायुकायाः१, वायुयोनिकाऽप्कायाः२, वायुयोनिकाग्निकायाः३, वायुयोनिकास्त्रसाः४, एवं क्रमेण चत्वारः आलापका ज्ञातव्याः ॥सू०१८-६०॥

जीव कहे हैं। उसी प्रकार वायुयोनिक अग्निकाय, अग्नियोनिक अग्निकाय और अग्नियोनिक त्रसकाय इस क्रम से तीन आलापक जानना चाहिए।

अब वायुकाय के विषय में कहते हैं-इस लोक में कितनेक जीव ऐसे हैं जो पूर्व भवों में अनेक प्रकार की योनि में उत्पन्न होकर अपने किये कर्म के बल से त्रस और स्थावर जीवों के सचित्त तथा अचित्त शरीरों में वायुकाय के रूप में उत्पन्न होते हैं। अग्नि जीवों के जैसे चार आलापक कहे गए हैं, उसी प्रकार यहां भी चार आलापक कहना चाहिए। वे यो हैं-(१) वायुकाय (२) वायुयोनिक अप्काय (३) वायुयोनिक अग्निकाय और (४) वायुयोनिक त्रस ।सू० १८॥

કહેલા છે. એજ પ્રમાણે વાયુયેાનિવાળા અગ્નિકાય, અગ્નિયેાનિક અગ્નિકાય, અને અગ્નિયેાનિક ત્રસકાય આ ક્રમથી ત્રણ આલાપકેા સમજી લેવા જોઈએ

વાયુકાયના સંબધમાં હવે કથન કરે છે.—આ લેાકમાં કેટલક જીવેા એવા હેાય છે જેએા પૂર્વભવેામાં અનેક પ્રકારની યેાનિયેામાં ઉત્પન્ન થઇને પેાતે કરેલા કર્મના બળથી ત્રસ અને સ્થાવર જીવેાના સચિત્ત તથા અચિત્ત શરીરેામાં વાયુકાય પણાથી ઉત્પન્ન થાય છે. અગ્નિ જીવેા પ્રમાણે આના પણ ચાર આલાપકેા કહ્યા છે. તેા તે પ્રમાણે ચાર આલાપકેા સમજી લેવા. તે આ પ્રમાણે છે.-(૧) વાયુકાય (૨) વાયુ યેાનિક (૩) વાયુ યેાનિક અગ્નિકાય અને (૪) વાયુયેાનિવાળા ત્રસ ।।સૂ૦ ૧૮।।

मूलम्–अहावरं पुरक्खायं इहेगइया सत्ता णाणाविहजोणिया जाव कम्मणियाणेणं तत्थ वुक्कमा णाणाविहाणं तसथावराणं पाणाणं सरीरेसु सचित्तेसु वा अचित्तेसु वा पुढवित्ताए सक्करत्ताए वालुयत्ताए इमाओ गाहाओ अणुगंतव्वाओ–

'पुढवी य सक्करा वालुया य, उवले सिला य लोणूसे ।
अयतउयतंबसीसग, रुप्पसुवण्णे य वइरे य ॥१॥
हरियाले हिंगुलए मणोसिला सासगंजणपवाले ।
अब्भपडलब्भवालुय बायरकाए मणिविहाणा ॥२॥
गोमेज्जए य रयए अंके फलिहे य लोहियक्खे य ।
मरगयमसारगल्ले, भुयमोयगइंदणीले य ॥३॥
चंदणगेरुय हंसगब्भपुलए सोगंधिए य बोद्धव्वे ।
चंदप्पभवेरुलिए जलकंते सूरकंते य' ॥४॥

एयाओ एएसु भणियव्वाओ गाहाओ जाव सूरकंतत्ताए विउट्टंति, ते जीवा तेसिं णाणाविहाणं तसथावराणं पाणाणं सिणेहमाहारेंति, ते जीवा आहारेंति पुढविसरीरं जाव संतं, अवरेऽवि य णं तेसिं तसथावरजोणियाणं पुढवीणं जाव सूरकंताणं सरीरा णाणावण्णा जाव मक्खायं, सेसा तिण्णि आलावगा जहा उदगाणं ॥सू० १९।६१॥

छाया—आथाऽपरं पुराख्यातम् इहैकतये सत्त्वाः नानाविधयोनिकाः यावत् कर्मनिदानेन तत्र व्युत्क्रमाः नानाविधानां त्रसस्थावराणां प्राणानां शरीरेषु सचित्तेषु वा अचित्तेषु वा पृथिवीतया शर्करतया वालुकतया इमा गाथा अनुगन्तव्याः–

'पृथवी च शर्करा च लुका च, उपलः शिला च लवणम् ।
अयस्त्रपुताम्रशीशक, रूप्यसुवर्णानि च वज्राणि च ॥१॥

हरितालं हिङ्गुलकं मन शिला शशकाञ्जनप्रवालाः ।
अभ्रपटलाभ्रवालुका वादरकाये मणिविधानाः ॥२॥
गोमेद्यकं च रजतमङ्क स्फाटिकं च लोहिताक्षश्च ।
मरकतमसारगल्वं, भुजमोचकमिन्द्रनीलश्च ॥३॥
चन्दनगेरुकहंसगर्भपुलाकं सौगन्धिकश्च बोद्धव्यम् ।
चन्द्रप्रभवैडूर्यं जलकान्तः सूर्यकान्तश्च ।४॥

एता एतेषु भणितव्याः गाथा यावत् सूर्यकान्ततया विवर्तन्ते । ते जीवा स्तेषां नानाविधानां त्रसस्थावराणां प्राणानां स्नेहमाहारयन्ति, ते जीवा आहारयन्ति पृथिवीशरीरं यावत् स्यात् । अपराण्यपि च खलु तासां त्रसस्थावरयोनिकानां पृथिवीनां यावत् सूर्यकान्तानां शरीराणि नानावर्णानि यावदाख्यातानि शेषास्त्रयः आलापका यथोदकानाम् ।सू० १९-६१॥

टीका—अनन्तरं तीर्थकृताऽपि जीवप्रकारा दर्शिताः, तथाहि-'अहावरं पुरक्खायं' अथाऽपरं पुराख्यातम् 'इहेगइया सत्ता' इहैकतये सत्त्वाः इह लोकेऽनेकप्रकारका जीवाः 'णाणाविहजोणिया' नानाविधयोनिकाः-विविधप्रकारकयोनिसमुत्पन्नाः सन्तः 'जाव कम्मणियाणेणं' यावत्कर्मनिदानेन-तत्र तत्र सम्पादित स्वकर्मप्रभावेण 'तत्थ वुक्कमा' तत्र व्युत्क्रमाः कर्मनिमित्तेन तत्रैव पृथिवीकाये समुत्पद्य स्थितिमवाप्य वर्धमानाः 'णाणाविहाणं' नानाविधानाम् 'तसथावराणं पाणाणं' त्रसस्थावराणां प्राणानाम्, 'सरीरेसु सचित्तेसु अचित्तेसु वा' सचित्तेषु अचित्तेषु वा शरीरेषु 'पुढवित्ताए सक्करत्ताए वालुयत्ताए' पृथिवीतया शर्करतया वालुकतया विवर्तन्ते उत्पद्यन्ते, तत्र शर्करा लघुप्रस्तरखण्डः, वालुका-'रेती' तिप्रसिद्धा-अयं भावः-कति जीवाः

'अहावरं पुरक्खायं' इत्यादि ।

टीकार्थ—तीर्थंकर भगवान् ने जीवों के अन्य प्रकार भी कहे हैं । इस लोक में नाना प्रकार की योनिवाले नाना प्रकार के जीव हैं । वे अपने कर्मों के कारण उन्न योनियो में आते हैं, वहां रहते हैं और वहां ही बढते हैं । विविध प्रकार के त्रस और स्थावर प्राणियों के सचित्त और अचित्त शरीरों में पृथ्वी रूप में शर्करा (पाषाण के छोटे खण्डों)

'अहावरं पुरक्खाय' ઇત્યાદિ

ટીકાર્થ—તીર્થંકર ભગવાને જીવોના બીજા પ્રકારો પણ કહ્યા છે. આ લોકમાં અનેક પ્રકારની યોનીવાળા અનેક જાતના જીવો છે, તેઓ પોતે કરેલા કર્મોને કારણે તે યોનિયોમાં આવે છે ત્યાં રહે છે અને વધે છે. અનેક પ્રકારના ત્રસ તથા સ્થાવર પ્રાણિયોના સચિત્ત અને અચિત્ત શરીરોમાં પૃથ્વીપણાથી શર્કરા-પત્થરના કકડા નાના નાના કકડાના રૂપથી તથા વાલુકા (રેત)ના

पूर्वकृतस्वकर्मोदयात् त्रसस्थावरप्राणिनां सचित्तेषु-अचित्तेषु वा शरीरेषु, तत्र-सचित्तेषु पृथिवीरूपेण तथा-दन्तिमस्तकेषु मुक्तारूपेण स्थावरवंशप्रभृतिषु मुक्ता फलरूपेण, एवमचित्तप्रस्तरादौ लवणरूपेण, तथा-नानाप्रकारकपृथिवीषु शर्करा वालुकासितालवणादिरूपेण उत्पद्यन्ते इति। 'इमाओ गाहाओ अणुगंतव्वाओ' प्रकृतविषये इमाः-वक्ष्यमाणा गाथा अनुगन्तव्याः। शास्त्रवर्णिता गाथा अनुगमनीयाः 'पुढवी य सक्करा'[1] पृथिवी च शर्करा[2] 'वालुया य उवले'[3] वालुका च उपलः[4]-पाषाणः 'सिलाय लोणूसे'[5] शिला च लवणः[6], तत्र लवणो लोकप्रसिद्धः, 'अयतउयतंबरीस रुप्पसुवण्णे य वइरे य'[7][8][9][10][11][12][13] अयस्त्रपुताम्रशीशक रूप्यसुवर्णानि च वज्राणि च, तत्र अयः-लोहः, त्रपुः-रांगा। 'हरियाले हिंगुलए मणोसिला सासगंजणपवाले'[14] हरितालं

के रूप में तथा वालुका (रेत) के रूप में प्रसिद्ध है। कहने का भाव यह है कि कितनेक जीव पहले किये अपने कर्म के उदय से त्रस एवं स्थावर प्राणियों के सचित्त अथवा अचित्त शरीरों में अर्थात् सचित्त में पृथ्वी के रूप में तथा हाथी के मस्तक में मुक्ता के रूप से तथा स्थावर में वांस आदि में मोती के रूप में एवं अचित्त में-पत्थर में लवण रूप से (सेंधव) नाना प्रकार की पृथ्वीयों में शर्करा, वालुका लवण आदि रूप से उत्पन्न होते हैं। तथा इसी प्रकार के अन्य रूपों में उत्पन्न होते हैं। उन रूपों को जानने के लिए इन गाथाओं का अनुसरण करना चाहिए। शास्त्र में वर्णित वह गाथाएँ इस प्रकार हैं-

(१) पृथ्वी (२) शर्करा (३) वालुका (४) उपल (पाषाण) (५) शिला (६) लवण-ऊष (खारी) (७) लोहा (८) रांगा (९) तांबा (१०) शीशा

રૂપે પ્રસિદ્ધ છે કહેવાનો આશય એ છે કે—કેટલાક જીવો પહેલાં કરેલા પોતાના કર્મના ઉદયથી ત્રસ અને સ્થાવર પ્રાણિયોના સચિત્ત અથવા અચિત્ત શરીરોમા અર્થાત્ સચિત્તમાં પૃથ્વીના રૂપે તથા હાથીના માથામાં મોતીના રૂપે તથા સ્થાવરમાં વાંસ વિગેરેમાં મોતી રૂપે એવં અચિત્તમાં પત્થરમાં લવણ રૂપે (સીંધાલુણ) અનેક પ્રકારેની પૃથ્વીયોમાં શર્કરા, વાલુકા, લવણ વિગેરે રૂપે ઉત્પન્ન થાય છે તથા આવા પ્રકારના બીજા રૂપોમાં ઉત્પન્ન થાય છે તે રૂપોને જાણવા માટે આ ગાથાઓનું અનુસરણ કરવું જોઈએ

શાસ્ત્રમા વર્ણવેલ તે ગાથાઓ આ પ્રમાણે છે—(૧) પૃથ્વી (૨) શર્કરા (૩) વાલુકા (૪) ઉપલ-પાષાણ (૫) શિલા (૬) લવણ-ઉષ (ખાર)

हिङ्गुलकं[१५] मनःशिला[१६], शशकाञ्जने[१७ १८] इमौ रत्नविशेषौ, प्रवालो[१९] विद्रुमः[२०], 'अब्भ-पडलब्भवालुयवायरकाए[२१], अभ्रपटलाभ्रवालुकावादरकायः[२२], तत्र-अभ्रपटलं गगनस्य जलावसायः अभ्रवालुका तु जलावसाययुक्ता धूलि', बादरकायः पृथिवीभेदः, 'मणिविहाणा' मणिविधानाः 'गोमेज्जए य रयए अंके फलिहे य लोहियक्खेय[२३]' गोमेद्यकं[२३] च रजतमङ्कं[२४] स्फटिकश्च[२५] लोहिताख्यश्च[२६], 'मरगयमसारगल्ले भुयमोयगइंदणीले य' मरकतो मसारगल्लो[२७] भुजमोचकमिन्द्रनीलश्च[२८ २९ ३०]। 'चंदणगेरुयहंसगब्भपुलए सोगंधिए य बोद्धव्वे' चन्दनगेरुकहंसगर्भपुलाकं[३१ ३२ ३३ ३४] सौगन्धिकं[३५] च बोद्धव्यम्। 'चंदप्पभ-वेरुलिए-जलकंते-सूरकंते य' चन्द्रप्रभं[३६]-वैडूर्यं[३७]-जलकान्तः[३८]-सूर्यकान्तश्च[३९]। उपर्युक्तगाथासु ये ये-उक्तास्तेभ्य आरभ्य सूर्यकान्तपर्यन्तयोनिषु समुत्पन्नाः समुत्पत्स्यमानाश्च ते ते पृथिवीजीवाः। 'एयाओ एएसु

---

(११) चांदी (१२) स्वर्ण (१३) वज्र (१४) हरताल (१५) हिंगुलक (१६) मैनसिल (१७) शासक (१८) अंजन (१९) प्रवाल (२०) अभ्रपटल (आकाश का जलावसाय) (२१) अभ्रवालुका जलावसाय से युक्त धूल (ये बादर पृथ्वीकाय के भेद हैं) अब मणियों के भेद कहते हैं (२२) गोमेद (२३) रजत (२४) अंक (२५) स्फटिक (२६) लोहिताक्ष (२७) मरकत (२८) मसारगल्ल (२९) भुजपरिमोचक (३०) इन्द्रनील (३१) चन्दन (३२) गेरुक (३३) हंसगर्भ (३४) पुलाक (३५) सौगंधिक (३६) चन्द्रप्रभ (३७) वैडूर्य (३८) जलकान्त और (३९) सूर्यकान्त, ये सब मणियों के प्रकार हैं।

---

(૭) લોઢું (૮) રાંગુ (૯) તાંબુ (૧૦) શીસુ (૧૧) ચાંદી (૧૨) સ્વર્ણ (૧૩) વજ્ર (૧૪) હરતાળ (૧૫) હિંગળોક (૧૬) મૈનસિલ (૧૭) શાસક (૧૮) અંજન (૧૯) પ્રવાલ (૨૦) અભ્રપટલ (આકાશના જલાવસાય) (૨૧) અભ્રવાલુકા જલાવસાયથી યુક્ત ધૂળ (આ બાદર પૃથ્વીકાયના ભેદો છે. હવે મણિયોના ભેદો કહેવામાં આવે છે. (૨૨)ગોમેદ (૨૩) રજત (૨૪) અંક (૨૫) સ્ફટિક (૨૬) લોહિતાક્ષ (૨૭) મરકત (૨૮) મસાર ગલ્લ (૨૯) ભુજ પરિમોચક (૩૦) ઇન્દ્ર નીલ (૩૧) ચંદન (૩૨) ગેરૂક (૩૩) હંસગર્ભ (૩૪) પુલાક (૩૫) સૌગંધિક (૩૬) ચન્દ્રપ્રભ (૩૭) વૈડૂર્ય (૩૮) જલકાંત અને (૩૯) સૂર્યકાંત આ બધા મણિયોના પ્રકારો છે.

भणियव्वाओ गाहाओ जाव सूरकंतत्ताए विउट्टंति' एतेषु भणितव्या एता गाथाः यावत्सूर्यकान्ततया विवर्त्तन्ते, तत्र गोमेद्यकं-रत्नविशेषः, रजतम्-'चान्दीति' लोकप्रसिद्धम्, अङ्को रत्नविशेषः, एवं सूर्यकान्ताः सर्वेऽपि रत्नविशेषा ज्ञातव्याः। ते जीवा स्तत्तद्योनिषु समुत्पद्यन्ते 'ते जीवा तेसिं णाणाविहाणं तसथावराणं पाणाणं सिणेहमाहारेंति' ते जीवा स्तेषां नानाविधानां त्रसस्थावराणां जीवानां स्नेहमाहारयन्ति। 'ते जीवा आहारेंति पुढवीसरीरं जाव संतं' ते जीवा आहारयन्ति पृथिवीशरीरं यावत् स्यात्। 'अवरे वि य णं तेसिं तसथावरजोणियाणं पुढवीणं जाव सूरकंताणं' अपराण्यपि खलु तेषां त्रसस्थावरयोनिकानां पृथिवीनाम् यावत्सूर्यकान्तानाम्। 'सरीरा' शरीराणि 'णाणावण्णा जाव मक्खायं' नानावर्णानि यावदाख्यातानि सेया तिण्णि आलावगा जहा उदगाणं' शेषास्त्रय आलापकाः, यथोदकानाम्-पृथिवीकायाः१, पृथिवीयोनिकपृथिवीकायाः२, पृथिवीयोनिकत्रसकायाः३, उदकवत् त्रय आलापकाः वेदितव्याः ॥१९-६१॥

मूलम्-अहावरं पुरक्खायं सव्वे पाणा सव्वे भूया सव्वे जीवा सव्वे सत्ता णाणाविहजोणिया णाणाविहसंभवा णाणाविह वुक्कमा सरीरजोणिया सरीरसंभवा सरीरवुक्कमा सरीराहारा कम्मोवगा कम्मनियाणा कम्मगइया कम्मठिइया कम्मणा चेव विप्परियासमुवेंति। से एवमायाणाहि से एवमायाणित्ता आहारगुत्ते सहिए समिए सया जए त्ति बेमि ॥सू० २०॥

॥ बियसुयक्खंधस्स आहारपरिण्णा णाम तईयमज्झयणं समत्तं ॥

इन गाथाओं में जिनका उल्लेख किया गया है, इन सब सूर्यकान्त पर्यन्त योनियों में उत्पन्न होनेवाले जीव पृथ्वीकाय हैं। वे जीव नाना प्रकार के त्रस और स्थावर जीवों के स्नेह का आहार करते हैं। वे पृथ्वीकाय आदि का भी आहार करते हैं। उन त्रस स्थावरयोनिक पृथ्वी जीवों के अन्य भी नाना वर्ण रस गंध स्पर्श वाले शरीर कहे गए हैं, उन्हीं के अनुसार जानना चाहिए ॥१९॥

આ ગાથાઓમાં જેઓનો ઉલ્લેખ કરવામાં આવેલ છે. તે બધા સૂર્યકાન્ત સુધીની યોનિયોમાં ઉત્પન્ન થવાવાળા જીવો પૃથ્વીકાય છે. તે જીવો અનેક પ્રકારના ત્રસ અને સ્થાવર જીવોના સ્નેહનો આહાર કરે છે તેઓ પૃથ્વીકાય વિગેરેનો પણ આહાર કરે છે. તે ત્રસ સ્થાવર યોનિવાળા પૃથ્વીકાય જીવોના બીજા પણ અનેક વર્ણ, ગંધ, રસ, અને સ્પર્શવાળા શરીરો કહ્યા છે. તે પ્રમાણે સમજવા. ॥સૂ૦ ૧૯॥

छाया—अथाऽपर पुराख्यातम्, सर्वे प्राणाः सर्वाणि भूतानि सर्वे जीवाः सर्वे सत्त्वाः, नानाविधयोनिकाः नानाविधसम्भवाः नानाविधव्युत्क्रमाः, शरीर योनिकाः शरीरसम्भवाः शरीरव्यु-क्रमाः शरीराहाराः कर्मोपगाः कर्मनिदानाः कर्मगतिकाः कर्मस्थितिकाः कर्मणा चैव विपर्यासमुपयन्ति । तदेवं जानीहि, तदेवं ज्ञात्वा आहारगुप्तः सहितः समितः सदा यतः इतिब्रवीमि ॥सू०२०॥

॥ द्वितीयश्रुतस्कन्धस्य आहारपरिज्ञानाम तृतीयमध्ययनं समाप्तम् ॥

टीका-अतः परं शास्त्रकारोऽध्ययनार्थमुपसंहरन् सामान्यरूपेण सर्वप्राणिनामवस्थां दर्शयित्वा साधुभिः संयमपरिपालने मनोविधेयमिति दर्शयति-'अहावरं' पुरक्खायं' अथाऽपरं पुराख्यातम्-तीर्थकरेणापरमपि वस्तु पुरा प्रतिपादितम् । 'सव्वे पाणा' सर्वे प्राणाः-प्राणिनः, 'सव्वे भूया' सर्वाणि भूतानि 'सव्वे जीवा' सर्वे जीवाः 'सव्वे सत्ता' सर्वे सत्त्वाः 'णाणाविहजोणिया' नानाविधयोनिकाः-अनेकप्रकारकयोनिसमुद्भवाः, 'णाणाविहसंभवा' नानाविधसम्भवाः अनेकप्रकारकयोनिषु स्थिताः, वर्तमानाः 'णाणाविहवुक्कमा' नानाविधव्युत्क्रमाः, इहलोके ये केचन जीवाः, अनेकप्रकारकयोनिषु समुपपद्यन्ते-तिष्ठन्ति-वर्द्धन्ते च । 'सरीर जोणिया' शरीरयोनिकाः-शरीरमेव योनिः-उत्पत्तिस्थानं येषां ते तथा-शरीरोत्पन्नाः-लिक्षायूकादयः । तथा-'सरीरसंभवा' शरीरसम्भवाः-शरीर एव स्थिताः

'अहावरं पुरक्खायं' इत्यादि ।

टीकार्थ—शास्त्रकार अब अध्ययन के अर्थ का उपसंहार करते हुए सामान्य रूप से सभी प्राणियों की दशा का वर्णन करवाकर यह कहते हैं कि साधुओं को संयम का पालन करने में मन लगाना चाहिए।

तीर्थंकर भगवान् ने पूर्वकाल में अन्य वस्तु भी कही है। संसार के सभी प्राणी, सर्व भूत, सर्व जीव और सर्व सत्त्व अनेक प्रकार की योनियों में उत्पन्न होते हैं, अनेक प्रकार की योनियों में स्थित हैं और अनेक प्रकार की योनियों में वृद्धि को प्राप्त होते हैं। इन में लीख जूं

'अहावरं पुरक्खायं' ઈત્યાદિ

ટીકાર્થ—શાસ્ત્રકાર હવે અધ્યયનના અર્થનો ઉપસંહાર કરતાં સામાન્ય પણાથી પણ પ્રાણિયોની દશાનું વર્ણન કરાવીને એ કહે છે કે—સાધુઓએ સંયમનું પાલન કરવામાં મન લગાવવું જોઈએ.

તીર્થંકર ભગવાને પૂર્વકાળમાં અન્ય વિષય સંબંધી પણ કથન કરેલ છે. સંસારના સઘળા પ્રાણિયો, સઘળા ભૂતો સઘળા જીવો અને સઘળા સત્વો અનેક પ્રકારની યોનિયોમાં ઉત્પન્ન થાય છે અનેક પ્રકારની યોનિયોમાં સ્થિત રહે છે. અને અનેક પ્રકારની યોનિયોમાં વધે છે તેમાં લીખ,

शरीरादेव जायमानाः, 'सरीरवुक्कमा' शरीरव्युत्क्रमाः-शरीरे एव परिवर्धमाना भवन्तो दृश्यन्ते। 'सरीराहारा' शरीराहाराः-मनुष्यादिशरीरस्यैवाऽऽहारं कुर्वन्ति। 'कम्मोवगा' कर्मोपगाः- स्वस्वकर्मवशगाः 'कम्मणियाणा' कर्मनिदानाः-कर्मैव निदानमादिकारणं येषां ते तथा-कर्माऽऽत्महेतुमासाद्य तत्र तत्र जायन्ते, 'कम्मगइया' कर्मगतिकाः-कर्माऽनुसारगतियुक्ताः, 'कम्मट्ठिइया' कर्मस्थितिकाः-कर्माऽनुसारस्थितिमन्तः 'कम्मणा चेव विप्परियासमुवेंति' कर्मणा चैव विपर्यासम्-अनेकविधगतिमुपयन्ति। 'से एवमायाणाहि' तदेवं जानीहि जीवाः कर्माधीनाः कालाऽधीना भवन्ति। 'से एवमायाणित्ता' तदेवं ज्ञात्वा 'आहारगुत्ते' आहारगुप्तः-सदोषाहारान्निवृत्तो भव, 'सहिए' सहितः-निरवद्याहारयुक्तो भव 'समिए' समितः-पञ्च समितिसमितो भव 'सया जए' सदा यतः-संयमे यतनावान् भव. 'त्ति बेमि' इति ब्रवीमि, सुधर्मस्वामी जम्बूस्वामिनं कथयति-हे शिष्य! एवमेव यथोक्तं मया जीवविषये आहारादिकं कर्मस्वरूपं त्वं जानीहि, ज्ञात्वा च

आदि शरीरयोनिक हैं अर्थात् शरीर में उत्पन्न होते हैं, शरीर में स्थित होते हैं और शरीर में ही बढते देखे जाते हैं। वे मनुष्य आदि के शरीर का ही आहार करते हैं। अपने अपने कर्म के वशीभूत हैं। कर्म ही उनका आदि कारण है। कर्म के अनुसार उनकी गति होती है, कर्म के अनुसार स्थिति होती है और कर्म से ही उनमें उलटफेर होता है। अतएव यह समझो कि संसार के समस्त प्राणी कर्म के अधीन हैं। ऐसा जानकर सदोष आहार से निवृत्त होओ, निर्दोष आहार से युक्त होओ, समितियों से समित तथा सदैव संयम में यातनावान् बनो।

'त्ति बेमि' सुधर्मा स्वामी जम्बू स्वामी से कहते हैं-हे शिष्य! जीव के आहार आदि के विषय में तथा कर्म स्वरूप के विषय में मैंने जो कहा

જૂ વિગેરે શરીર સંબંધી યોનિવાળા છે, અર્થાત્ શરીરમા ઉત્પન્ન થાય છે શરીરમા સ્થિત હોય છે, અને શરીરમાં જ વધતા દેખાય છે તે મનુષ્ય વિગેરેના શરીરોનો જ આહાર કરે છે. પોત પોતાના કર્મને વશ થયેલા છે કર્મજ તેઓનુ આદિકારણ છે કર્મ પ્રમાણે તેઓની ગતિ થાય છે. કર્મ પ્રમાણે જ સ્થિતિ હોય છે અને કર્મથી તેઓમાં ઉલટ પાલટ થાય છે. તેથી જ એમ સમજવું કે-જગતના સઘળા પ્રાણિયો કર્મને જ આધીન છે, આ પ્રમાણે સમજીને સદોષ-દોષવાળા આહારથી નિવૃત્ત થવું નિર્દોષ આહારથી યુક્ત થવું. સમિતિયોથી સમિત તથા હમેશાં સંયમમાં યતનાવાન્ બનો

'ત્તિ બેમિ' સુધર્મસ્વામી જમ્બૂસ્વામીને કહે છે કે—હે શિષ્ય! જીવના આહાર વિગેરેના સંબંધમાં તથા કર્મના સ્વરૂપના સંબંધમા મે જે કથન કર્યું

आहारसमितिगुप्त्यादिभिर्युक्तः सदा संयमपरिपालने प्रयत्नवान् भवेति कथयामि। सर्वेऽमी प्राणिनो बद्धैः कर्मभिरायत्ताः भासाद्याऽऽसाद्य तत्तच्छरीरं तस्मिन् शरीरे भवन्ति तिष्ठन्ति वर्द्धन्ते च पौनःपुन्येन शरीरमाहरन्तः सावद्यकर्मणा पापं सञ्चित्य भ्रमन्ति संसारचक्रमितस्ततः। अतः सावद्यं कर्माऽनुष्ठानं जहीहि, संयमं पालय। एष उपदेशः शास्त्राज्ञानुशासन च तीर्थकृताम्। 'वियसुयक्खंधस्स' द्वितीयश्रुतस्कन्धस्य 'आहारपरिण्णाणामं' आहारपरिज्ञानाम 'तईयमज्झयणं समत्तं' तृतीयमध्ययनं समाप्तम् ॥सू०२०॥

इति श्री-विश्वविख्यातजगद्वल्लभादिपदभूषितबालब्रह्मचारि - 'जैनाचार्य' पूज्यश्री-घासीलालव्रतिविरचितायां श्री सूत्रकृताङ्गसूत्रस्य "समयार्थबोधिन्याख्यया" व्याख्यया समलङ्कृतम् द्वितीयश्रुतस्कन्धीयाऽऽहारपरिज्ञानाम तृतीयाऽध्ययनं समाप्तम् ॥

है, उसे जानो और जान कर आहार संबंधी समिति से युक्त तथा गुप्ति आदि से सम्पन्न होकर सदा संयम पालन में प्रयत्नवान् बनो। यही मैं कहता हूं। सभी प्राणी कर्मों के अधीन हैं और विभिन्न शरीरों को प्राप्त करके उनमें उत्पन्न होते, स्थित रहते और बढते हैं। वे बार बार शरीर धारण करके पापमय कृत्य करते हैं, पापों का संचय करते हैं और संसार अटवी में परिभ्रमण करते हैं। अतएव सावद्य कर्मों को तज दो और साधु दीक्षा को धारण करके, आहार शुद्धि से युक्त तथा शुद्ध और बुद्ध बनकर संयमपालन संबंधी अन्तराय को दूर करो। यही तीर्थंकरो का उपदेश है, यही शास्त्राज्ञा हैं और यही अनुशासन हैं ॥२०॥

॥ दूसरा श्रुतस्कन्ध का तीसरा अध्ययन समाप्त ॥

છે. તેને સમજો અને સમજીને આહાર સમિતિથી યુક્ત તથા ગુપ્તિ વિગેરેથી યુક્ત થઇને સદા સંયમ પાલન કરવામાં પ્રયત્નવાન્ બનો, એજ હું કહું છું.

સઘળા પ્રાણિયો કર્મને જ અધીન છે અને જૂદા જૂદા શરીરોને પ્રાપ્ત કરીને તેમાં ઉત્પન્ન થાય છે. સ્થિત રહે છે. અને વધે છે. તેઓ વારંવાર શરીરને ધારણ કરીને પાપ મય કૃત્યો કરે છે. પાપોનો સંગ્રહ કરે છે અને સંસાર રૂપી જંગલમાં ભટકતા રહે છે તેથી જ સાવદ્ય કર્મોનો ત્યાગ કરવો. અને સાધુ દીક્ષાને ધારણ કરીને આહાર શુદ્ધિથી યુક્ત તથા શુદ્ધ અને બુદ્ધ બનીને સંયમ પાલન સંબંધી અંતરાયને દૂર કરો. એજ તીર્થંકરોનો ઉપદેશ છે. એજ પ્રમાણે શાસ્ત્રની આજ્ઞા છે અને એજ અનુશાસન છે. ॥સૂ૦૨૦॥

॥ બીજા શ્રુતસ્કંધનુ ત્રીજું અધ્યયન સમાપ્ત ॥૨-૩॥

अथ चतुर्थमध्ययनं प्रारभ्यते-

तृतीयाऽध्ययनाऽन्ते-'आहारविशुद्धिः कर्त्तव्या' इत्युपदिष्टम्। आहारविशुद्धया श्रेयःप्राप्तिः तदभावे चाऽनर्थप्राप्तिः, इति-अन्वयव्यतिरेकाभ्यां साधनभूताया आहारविशुद्धेः श्रेयः प्राप्तिकारणतां ज्ञात्वा श्रेयसोऽर्थिभिराहारगुप्तिः कर्त्तव्या। परन्तु-आहारविशुद्धिर्न प्रत्याख्यानमन्तरेण सम्भवति, अत आहारविशुद्धेः कारणभूतप्रत्याख्यानोपदेशाय चतुर्थाऽध्ययनस्य प्रारम्भो भवति।

मूलम्-सुयं मे आउसं तेणं भगवया एवमक्खायं। इह खलु पच्चक्खाणकिरिया णामज्झयणे तस्स णं अयमट्ठे पण्णत्ते। आया अपच्चक्खाणी यावि भवइ। आया अकिरिया कुसले यावि भवइ। आया मिच्छा संठिए यावि भवइ, आया एगंतदंडे यावि भवइ, आया एगंतबाले यावि भवइ, आया एगंत-

---

चतुर्थ अध्ययन का प्रारंभ

तीसरे अध्ययन के अन्त में आहार शुद्धि का उपदेश दिया गया है। आहार शुद्धि से कल्याण की प्राप्ति होती है और उसके अभाव में अनर्थ की प्राप्ति होती है। इस प्रकार अन्वय और व्यतिरेक के द्वारा आहार विशुद्धि श्रेयस् का कारण है। ऐसा जानकर श्रेयस् (कल्याण) के अभिलाषी पुरुषों को आहार गुप्ति का सेवन करना चाहिए। परन्तु आहार की विशुद्धि प्रत्याख्यान के विना संभवित नहीं है, अतएव आहारशुद्धि के कारणभूत प्रत्याख्यान क्रिया का उपदेश देने के लिए चौथे अध्ययन का आरंभ किया जाता है-'सुयं मे आउसं तेणं' इत्यादि।

ચોથા અધ્યયનનો પ્રારંભ—

ત્રીજા અધ્યયનના અંતમાં આહાર શુદ્ધિનો ઉપદેશ આપેલ છે. આહાર શુદ્ધિથી કલ્યાણની પ્રાપ્તિ થાય છે અને તેના અભાવમાં અનર્થ થાય છે. આ રીતે અન્વય અને વ્યતિરેક દ્વારા આહાર વિશુદ્ધિ કલ્યાણનું કારણ છે. એ પ્રમાણે જાણીને કલ્યાણની ઇચ્છા રાખવા વાળા પુરૂષોએ આહાર ગુપ્તિનું સેવન કરવું જોઇએ પરતુ આહારની વિશુદ્ધિ પ્રત્યાખ્યાન વિના સંભવતી નથી. તેથી જ આહારશુદ્ધિના કારણ ભૂત પ્રત્યાખ્યાન ક્રિયાનો ઉપદેશ આપવા માટે આ ચોથા અધ્યયનનો પ્રારંભ કરવામાં આવે છે.—આ અધ્યયનનું પહેલું સૂત્ર આ પ્રમાણ છે. 'सुयं मे आउसं तेणं' ઇત્યાદિ.

सुत्ते यावि भवइ, आया अवियारमणवयणकायवक्के यावि भवइ, आया अप्पाडिहयअपच्चक्खायपावकम्मे यावि भवइ, एस खलु भगवया अक्खाए असंजए अविरए अप्पाडिहयअपच्चक्खायपावकम्मे सकिरिए असंवुडे एगंतदंडे एगंतबाले एगंतसुत्ते से बाले अवियारमणवयणकायवक्के सुविणमवि ण पस्सइ पावे य से कम्मे कज्जइ ॥सू० १-६३॥

छाया--श्रुतं मया-आयुष्मन् तेन भगवता एवमाख्यातम्। इह खलु प्रत्याख्यानक्रियानामाऽध्ययनं तस्य च अयमर्थः प्रज्ञप्तः। आत्मा अप्रत्याख्यानी अपि भवति, आत्माऽक्रियाकुशलश्चापि भवति, आत्मा मिथ्यासंस्थितश्चाऽपि भवति, आत्मा एकान्तदण्डश्चापि भवति, आत्मा-एकान्तबालश्चाऽपि भवति, आत्मा-एकान्त सुप्तश्चाऽपि भवति, आत्माऽविचारमनोवचनकायवाक्यश्चाऽपि भवति, आत्माऽप्रतिहताऽप्रत्याख्यातपापकर्माचाऽपि भवति। एष खलु भगवता आख्यातोऽसंयतोऽविरतोऽप्रतिहताऽप्रत्याख्यातपापकर्मा सक्रियोऽसंवृत एकान्तदण्ड एकान्तबाल एकान्तसुप्तः। स बालोऽविचारमनोवचनकायवाक्यः स्वप्नमपि न पश्यति, पापं च स कर्म करोति ॥सू० १-६३॥

टीका--'मे' मया 'आउसं' हे आयुष्मन् जम्बू! 'तेणं भगवया' तेन भगवता तीर्थंकरेण श्रीमहावीरस्वामिना 'एवमक्खायं' एवम् वक्ष्यमाणं वचः आख्यातम्-प्रतिपादितमिति 'सुयं' श्रुतम्-श्रवणविषयीकृतम् तदेवाहं भवते कथयामि। तथाहि-'इह खलु पच्चक्खाणकिरियाणामज्झयणं' इह खलु-जिनशासने प्रत्याख्यानक्रियानामाऽध्ययनम् 'तस्स णं अयमट्ठे पण्णत्ते' तस्य-क्रियानामाऽध्य-

---

टीकार्थ-सुधर्मा स्वामी जम्बू स्वामी से कहते हैं, हे आयुष्मन् जम्बू! तीर्थंकर भगवान् श्रीमहावीरस्वामी ने ऐसा प्रतिपादन किया है, मैंने सुना है। वही मैं तुम से कहता हूं। जिनशासन में प्रत्याख्यान क्रिया नामक अध्ययन कहा गया है। उस अध्ययन में यह अर्थ प्रति-

---

ટીકાર્થ—સુધર્મા સ્વામી જંબૂ સ્વામીને કહે છે—હે જમ્બૂ તીર્થંકર ભગવાન્ શ્રી મહાવીર સ્વામીએ આ પ્રમાણેનું પ્રતિપાદન કર્યું છે. તે મે સાંભળ્યું છે, એજ હું તમોને કહું છું. આ જીનશાસનમાં પ્રત્યાખ્યાન ક્રિયા નામનું અધ્યયન કહેલ છે તે અધ્યયનમાં આ પ્રમાણેનો અર્થ પ્રતિપાદન કરેલ છે. -આત્મા પ્રત્યાખ્યાની પણ હોય છે, અર્થાત્ આત્મા પોતાના અનાદિ વિકૃત

यनस्य 'णमिति वाक्यालङ्कारे' अयमर्थः कथितः 'आया अपच्चक्खाणी यावि भवइ' आत्माऽप्रत्याख्यानी चापि भवति-आत्मा स्वभावत एवाऽप्रत्याख्यानी भवति अनादिस्वभाववत्त्वाद् अपि शब्दात् प्रत्याख्यान्यपि भवति उक्तहेतौ मूले जीव-बोधनाय जीव इति पदमप्रयुज्य-आत्मेति कथनं साभिप्रायम्। सोऽयमभिप्रायः प्राणधारणात् जीव इति कथ्यते, अतति-सततं भवाद्भवान्तरं गच्छतीत्यात्मा, तथा चाऽऽत्मेति पदं प्रयुज्य अयमर्थो दर्शितः। यत्सावद्यकर्माण्यपरित्यजन् कर्म-बलात् सर्वदैव गमनशीलो न तु कथमपि महता कालेनाऽपि शान्तिं प्राप्नोति। किन्तु-सर्वदैवेतस्ततः परिभ्रमति, 'आया अकिरिया कुसले यावि भवइ' आत्मा-

---

पादित किया गया है-आत्मा अप्रत्याख्यानी भी होता है। अर्थात् आत्मा अपने अनादि विकृत स्वभाव से ही अप्रत्याख्यानी है। यहाँ मूल में 'भी' शब्द का प्रयोग यह सूचित करता है कि कोई कोई आत्मा प्रत्याख्यानी भी होता है।

मूलपाठ में 'जीव' का बोध कराने के लिए 'जीव' शब्द का प्रयोग न करके 'आत्मा' शब्द का जो प्रयोग किया गया है। उसका विशेष अभिप्राय इस प्रकार है-प्राणों को धारण करने के कारण जीव कहा जाता है और जो एक भव से दूसरे भव में गमन करता रहता है, वह आत्मा कहलाता है यहां 'आत्मा' शब्द का प्रयोग करके यह अर्थ प्रकट किया गया है कि सावद्य कृत्यों को न त्याग करके कर्म के वह वशवर्त्ती होकर जो सर्वदा गमनशील है, दीर्घकाल व्यतीत हो जाने पर भी जिसे शान्ति नहीं मिली है, जो सदा इधर उधर भटकता फिरता है, वह आत्मा अप्रत्याख्यानी होता है।

સ્વભાવથી જ અપ્રત્યાખ્યાની છે અહિયા મૂળમા 'भी' શબ્દનો પ્રયોગ એ સૂચવે છે કે-કોઇ કોઇ આત્મા પ્રત્યાખ્યાની પણ હોય છે તેમ સમજવું

મૂલ પાઠમાં 'जीव' નો બોધ કરાવવા માટે 'જીવ' શબ્દનો પ્રયોગ ન કરતાં 'आत्मा' શબ્દનો જે પ્રયોગ કરવામાં આવ્યો છે, તેનો વિશેષ અભિપ્રાય આ પ્રમાણે છે —પ્રાણોને ધારણ કરવાના કારણે જીવ કહેવાય છે. અને જે એક ભવથી બીજા ભવમાં ગમન કરતા રહે છે, તે આત્મા કહેવાય છે. અહિયાં 'आत्मा' શબ્દનો પ્રયોગ કરીને એ અર્થ પ્રગટ કરેલ છે કે-સાવદ્ય કૃત્યોનો ત્યાગ ન કરતાં કર્મને વશવર્ત્તી થઈને જે હંમેશા ગમન શીલ છે, દીર્ઘકાળ વીતી જાય તો પણ જેને શાંતિ મલતી નથી જે હમ્મેશાં આમ તેમ ભટકતા ફરે છે, તે આત્મા અપ્રત્યાખ્યાની હોય છે.

ऽक्रियाकुशलश्चाऽपि, शुभक्रियां न करोति-तादृशोऽपि भवति। कश्चन-अपि शब्दाच्छुभक्रियाकारी अपि भवति। 'आया मिच्छासंठिए यावि भवइ' आत्मा मिथ्यासंस्थितश्चापि भवति मिथ्यादृष्टिरपि भवति जीव इत्यर्थः, अपि शब्दात् सम्यग्दृष्टिरपि, 'आया एगंतदंडे यावि भवइ' आत्मा एकान्तदण्डश्चाऽपि भवति, एकान्तदण्डको हिंसकः अपि शब्दादहिंसकः, 'आया एगंतबाले यावि भवइ' आत्मा एकान्तबालश्चाऽपि, भवति, एकान्ततोऽज्ञानी अपि शब्दात् ज्ञानी अपि भवति 'आया एगंतसुत्ते यावि भवइ' आत्मा-एकान्तसुप्तश्च, अपि शब्दात् प्रतिबुद्धोऽपि, सुप्तवत् सुप्तः यथा द्रव्यसुप्तः पुरुषः शब्दादिविषयान् न जानाति तथैव भावसुप्त आत्मा हिताहितमाप्तिपरिहारविकलश्च। 'आया अवियारमण-

---

आत्मा अक्रियाकुशल भी होता है अर्थात् कोई आत्मा ऐसा भी होता है जो शुभ क्रिया नहीं करता है। यहां पर भी 'भी' शब्द से यह सूचित किया है कि कोई आत्मा शुभ क्रियाकारी भी होता है।

आत्मा मिथ्यादृष्टि भी होता है और 'भी' शब्द से सम्यग्दृष्टि भी होता है। इसी प्रकार आत्मा एकान्तदण्डहिंसक भी होता है और 'भी' शब्द से कोई कोई अहिंसक भी होता है। आत्मा एकान्त बाल (अज्ञानी) भी होता है और 'भी' शब्द से ज्ञानी भी होता है। आत्मा एकान्ततः सुप्त भी होता है और कोई कोई प्रतिबुद्ध भी होता है। यहां सुप्त के समान जो हो वह सुप्त कहा गया है। जैसे द्रव्यनिद्रा से सुप्त पुरुष शब्दादि विषयों को नहीं जानता है, उसी प्रकार भाव से सुप्त पुरुष को हित की प्राप्ति और अहित के

આત્મા અક્રિયા કુશળ પણ હોય છે અર્થાત્ કોઈ આત્મા એવા પણ હોય છે. કે જે શુભક્રિયા કરતા નથી અહિયાં પણ 'भी' શબ્દથી એ બતાવ્યું છે કે-કોઈ આત્મા ક્રિયાકારી પણ હોય છે.

આત્મા મિથ્યા દૃષ્ટિ પણ હોય છે. અને 'भी' શબ્દથી સમ્યગ્દૃષ્ટિ પણ હોય છે. એજ પ્રમાણે આત્મા એકાન્ત દંડ હિંસક પણ હોય છે. અને 'भी' શબ્દથી કોઇ કોઈ અહિંસક પણ હોય છે. આત્મા એકાન્ત બાલ (અજ્ઞાની) પણ હોય છે. અને 'भी' શબ્દથી જ્ઞાની પણ હોય છે આત્મા એકાન્તતઃ સુપ્ત પણ હોય છે. અને કોઇ કોઇ પ્રતિબુદ્ધ પણ હોય છે. અહિયાં સુપ્ત સરખા જે હોય તેને સુપ્ત કહેલ છે. જેમ દ્રવ્ય નિદ્રાથી સુતેલા પુરૂષને શબ્દ વિગેરે વિષયોનું જ્ઞાન હોતું નથી. એજ પ્રમાણે ભાવથી સૂતેલા પુરૂષને હિતની પ્રાપ્તિ અને અહિતના પરિહાર-ત્યાગનું જ્ઞાન હોતું નથી. આત્મા

